## सपत्रनिष्पत्रादतिव्यथने। (६१/२१३२)

कृञः इत्येव। सपत्रनिष्पत्रशब्दाभ्याम् अतिव्यथने डाच् प्रत्ययो [1]भवति कृञो योगे [2]सति। अतिव्यथनम् अतिपीडनम्। सपत्राकरोति मृगं व्याधः। सपत्रं शरमस्य शरीरे [3]प्रवेशयति इत्यर्थः। निष्पत्राकरोति। शरीराच्छरमपरपार्श्वे निष्क्रामयति इत्यर्थः। अतिव्यथने इति किम्? सपत्रं वृक्षं करोति [4]जलसेचकः। निष्पत्रं वृक्षतलं करोति [5]भूमिशोधकः॥

## निष्कुलान्निष्कोषणे। (६२/२१३३)

कृञः इत्येव। निष्कुलशब्दात् निष्कोषणे [6]वर्तमानात् कृञो योगे डाच् प्रत्ययो भवति। निष्कोषणम् अन्तरवयवानां बहिर्निष्कासनम्। निष्कुलाकरोति [7]पशून्। निष्कुष्णाति इत्यर्थः। निष्कोषणे[8] इति किम्? [9]निष्कुलान् करोति शत्रून्॥

## सुखप्रियादानुलोम्ये। (६३/२१३४)

[10]सुखप्रियशब्दाभ्याम् आनुलोम्ये[11] वर्तमानाभ्यां कृञो योगे डाच् प्रत्ययो भवति। आनुलोम्यम् अनुकूलता, [12]आराध्यचित्तानुवर्तनम्। सुखाकरोति। प्रियाकरोति। स्वाम्यादेः [13]चित्तमाराधयति इत्यर्थः। सुखं प्रियं [14]वा कुर्वन्नप्यानुलोम्येऽवस्थित एवमुच्यते। आनुलोम्ये इति किम्? सुखं करोति, प्रियं करोति औषधपानम्॥

## दुःखात् प्रातिलोम्ये। (६४/२१३५)

कृञः इत्येव। दुःखशब्दात् प्रातिपदिकात् प्रातिलोम्ये[15] गम्यमाने डाच् प्रत्ययो भवति कृञो योगे। प्रातिकूल्यं प्रतिकूलता। स्वाम्यादेश्चित्तपीडनम्। दुःखाकरोति भृत्यः[16]। प्रातिलोम्ये इति किम्? दुःखं करोति कदन्नम्॥

## शूलात् पाके। (६५/२१३६)

[17]कृञः इत्येव। शूलशब्दात् पाकविषये[18] डाच् प्रत्ययो भवति कृञो योगे। [19]शूले पचति शूलाकरोति [20]मांसम्। पाके इति किम्? शूलं करोति [21]कदन्नम्॥

---

1. सम्पद्यते ब.क.ड.फ.ह. 2. सति नास्ति फ. 3. प्रयोजयति फ. 4. जलसेकः क.ह. 5. भूमिशोषः क. 6. अर्थे इत्यधिकम् ब.फ, वर्तमानात् नास्ति फ. 7. पर्णम् क, दाडिमं ब, पशुम् ड, फलम् फ. 8. इत्येव फ.ड. 9. निष्कुलं करोति शत्रुम् क.ह. 10. कृञ इत्येव इत्यधिकम् ब.क.ड. 11. अर्थे इत्यधिकम् ब.फ, गम्यमाने इत्यधिकम् क. 12. अनाराध्यस्य क. 13. चित्ताराधनं करोति, चित्तमनुवर्तयति इत्यर्थ क. 14. वा नास्ति ब.ड, सुखप्रियमकुर्वन्नपि अस्यानुलोम्ये वर्तमाने एवमुच्यते ड. 15. अर्थे इत्यधिकम् ह. 16. स्वामिनः चित्तम् इत्यधिकम् क. 17. वाक्यमिदं नास्ति क. 18. वर्तमानात् इत्यधिकम् क. 19. शूलेन क. 20. पशुम् क. 21. तदन्नम् फ.